नं. १० २८८

#5771

ललितासहस्रनाम

F. 42

Complete

ल· स· १

ॐश्रीगणेशायनमः ॐश्रीगुरुपादुकाभ्योनमः
श्रीललितांबायैनमः अगस्त्यउवाच अश्वानन
महाबुद्धेसर्वशास्त्रविशारद कथितंललितादे
व्याश्चरितंपरमाद्भुतम् १ पूर्वंप्रादुर्भवोमातुस्त
तःपट्टाभिषेचनम् भंडासुरवधश्चैवविस्तरेण
त्वयोदितः २ वर्णितंश्रीपुरंचापिमहाविभवावि
स्तरम् श्रीमत्पंचदशाक्षर्यामहिमावर्णितस्तथा ३

षोढान्यासादयोन्यासान्यासखंडेसमीरिताः ३ अंत
र्यागक्रमश्चैवबहिर्यागक्रमस्तथा ४ महायागक्र
मश्चापिपूजाखंडेप्रकीर्तितः पुरश्चरणखंडेतुजप
लक्षणमीरितम् ५ होमखंडेत्वयाप्रोक्तोहोमद्रव्य
विधिक्रमः चक्रराजस्यविद्यायाःश्रीदेव्यादैशिका
त्मनोः ६ रहस्यखंडेतादात्म्यंपरस्परमुदीरितम्
स्तोत्रखंडेबहुविधाःस्तुतयःपरिकीर्तिताः ७ मंत्रि

ल॰ स॰ २ ण्णीदंडिनीदेव्योःप्रोक्तेनामसहस्रके नतुश्रीललिता
देव्याःप्रोक्तंनामसहस्रकम् ८ तत्रमेसंशयोजातो
हयग्रीवदयानिधे किंवात्वयाविस्मृतंतज्ज्ञात्वावा
समुपेक्षितम् ९ ममवायोग्यतानास्तिश्रोतुंनाम
सहस्रकम् किमर्थंभवतानोक्तंतत्रमेकारणंव
द १० सूतउवाच इतिपृष्टोहयग्रीवोमुनिनाकुंभ
जन्मना प्रहृष्टोवचनंप्राहतापसंकुंभसंभवम् ११

2

लोपामुद्रापतेगस्त्यसावधानमनाः शृणु नाम्नांस
हस्रंयन्नोक्तंकारणंतद्वदामिते १२ रहस्यमितिम
त्वाहंनोक्तवांस्तेनचान्यथा पुनस्त्वंपृच्छसेभक्त्यात
स्मात्तत्तेवदाम्यहम् १३ ब्रूयाच्छिष्यायभक्तायरह
स्यमपिदेशिकः भवतानप्रदेयंस्यादभक्तायकदा
चन १४ नशठायनदुष्टायनाविश्वासायकर्हिचित्
श्रीमातृभक्तियुक्तायश्रीविद्याराजवेदिने १५ उपा

ल· सकायश्रद्धायदेयंनामसहस्रकम् यानिनामसह
स· स्राणिसद्यःसिद्धिप्रदानिवै १६ तंत्रेषुललितादेव्या
३ स्तेषुमुख्यमिदंमुने श्रीविद्यैवचमंत्राणांतत्रका
३ दिर्यथापरा १७ पुराणांश्रीपुरमिवशक्तीनांललि
तायथा श्रीविद्योपासकानांचयथादेवोपरःशिवः
१८ तथानामसहस्रेषुपरमेतत्प्रकीर्तितम् यथा
स्यपठनाद्देवीप्रीयतेललितांबिका १९ अन्यनाम

सहस्रस्यपाठान्नप्रीयतेतथा श्रीमातुः प्रीतयेत
स्मादनिशं कीर्तयेदिदम् २० बिल्वपत्रैश्चक्रराजे
योर्चयेल्ललितांबिकाम् पद्मैर्वा तुलसीपुष्पैरभि
र्नामसहस्रकैः २१ सद्यः प्रसादं कुरुते तत्र सिंहा
सनेश्वरी चक्राधिराजमभ्यर्च्य जप्त्वा पंचदशाक्षरी
म् २२ जपांते कीर्तयेन्नित्यमिदं नामसहस्रकम्
जपपूजाद्यशक्तोपि पठेन्नामसहस्रकम् २३ सां

ल· गार्चने सांगजपे यत्फलं तदवाप्नुयात् उपासने स्तुती
स· रन्याः पठेदभ्युदयो हि सः २४ इदं नामसहस्रं तु की
४ र्तयेन्नित्यकर्मवत् चक्रराजार्चने देव्या जपो नाम्नां
च कीर्तनम् २५ भक्तस्य कृत्यमेतावदन्यदभ्युदयं
विदुः भक्तस्यावश्यकमिदं नामसाहस्रकीर्तनम्
२६ तत्र हेतुं प्रवक्ष्यामि शृणुत्वं कुंभसंभव श्री
ललितादेवी भक्तानां हितकाम्यया २७ वाग्देवीव

षिणीमुख्याः समाहूयेदमब्रवीत् वाग्देवतावशि
न्याद्याः शृणुध्वं वचनं मम २८ भवत्यो मत्प्रसादे
न प्रोल्लसद्वाग्विभूतयः मद्भक्तानां वाग्विभूतिप्र
दाने च नियोजिताः २९ मच्चक्रस्य रहस्यज्ञा मम ना
मपरायणाः मम स्तोत्रविधानाय तस्मादाज्ञापया
मि वः ३० कुरुध्वमङ्कितं स्तोत्रं मम नामसहस्रकैः
येन भक्तैः स्तुताया मे सद्यः प्रीतिः परा भवेत् ३१ ह

ल. हयग्रीवउवाच इत्याज्ञप्तावचोदेव्यःश्रीदेव्याललितां
स. बया रहस्यैर्नामभिर्दिव्यैश्चक्रुःस्तोत्रमनुत्तमम् ३२
५ रहस्यनामसाहस्रमितितद्विश्रुतंपरम् ततःकदा
5 चित्सदसिस्थित्वासिंहासनेंबिका ३३ स्वसेवाव
सरंप्रादात्सर्वेषांकुंभसंभव सेवार्थमागतास्तत्रब्र
ह्माणीब्रह्मकोटयः ३४ लक्ष्मीनारायणानांचकोट
यःसमुपागताः गौरीकोटिसमेतानांरुद्राणाम

पिकोटयः ३५ मंत्रिणीदंडिनीमुख्याः सेवार्थं याः
समागताः शक्तयो विविधाकारास्तासां संख्या न वि
द्यते ३६ दिव्यौघा मानवौघाश्च सिद्धौघाश्च समाग
ताः तत्र श्रीललितादेवी सर्वेषां दर्शनं ददौ ३७ ते
दृष्ट्वोपविष्टाश्च स्वे स्वे स्थाने यथाक्रमम् तत्र श्री
ललितादेवीकटाक्षाक्षेपचोदिताः ३८ अथायव
शिनीमुख्या बद्धाञ्जलिपुटास्तथा अस्तुवन्नामस

ल· हस्यैः स्वकृतैर्ललितांबिकाम् ३९ श्रुत्वा स्तवं प्रसन्ना
स· भूल्ललिता परमेश्वरी सर्वे ते विस्मयं जग्मुर्ये तत्र सद
८ सि स्थिताः ४० ततः प्रोवाच ललिता सदस्यान्देवताग
6 णान् ममाज्ञयैव वाग्देव्यश्चक्रुः स्तोत्रमनुत्तमम् ४१
ङ्कितं नामभिर्दिव्यैर्मम प्रीतिविधायकैः तत्पठ
ध्वं सदा यूयं स्तोत्रं मत्प्रीतिवृद्धये ४२ प्रवर्तयध्वं भ
क्तेषु मम नामसहस्रकम् इदं नामसहस्रं मे यो भ

त्रः पठते सकृत् ४३ समेप्रियतमोज्ञेयस्तस्मैकामा
न्ददाम्यहम् श्रीचक्रेमांसमभ्यर्च्यजप्त्वापंचदशा
क्षरीम् ४४ पश्चान्नामसहस्रंमेकीर्त्तयेन्ममतुष्टये
मामर्चयन्तुवामावाविद्यांजपन्तुवानवा ४५ कीर्त्त
येन्नामसाहस्रमिदंमत्प्रीतयेसदा मत्प्रीत्यासक
लान्कामाँल्लभतेनात्रसंशयः ४६ तस्मान्नामसह
स्रंमेकीर्त्तयध्वंसदादरात् इतिश्रीललितेशानीश

ल० स० ८

स्त्रिदेवान्सहस्रानुगान् ४७ तदाज्ञयातदारभ्यब्रह्मविष्णु
महेश्वराः शक्तयोमंत्रिणीमुख्याइदंनामसहस्रक
म् ४८ पठंतिभक्त्यासततंललितापरितुष्टये त
स्मादवश्यंभक्तेनकीर्तनीयमिदंमुने ४९ आवश्य
कत्वेहेतुस्तेमयाप्रोक्तोमुनीश्वर इदानींनामसाह
स्रंवक्ष्यामिश्रद्धयाशृणु ५० ॐ अस्यश्रीललितास
हस्रनामस्तोत्रमालामंत्रस्य वशिन्यादिभ्योवाग्दे

वत्तादिभ्यऋषिभ्योनमः शिरसि अनुष्टुप्छंदसे
नमः मुखे श्रीमहात्रिपुरसुंदर्यैदेवतायैनमः हृ
दि क ष बीजायनमः नाभौ स ह शक्तयेनमः आ
धारे हृ ५ कीलकायनमः पादयोः चतुर्विधपु
रुषार्थसिध्यर्थेजपेविनियोगायनमः सर्वांगेषु
कूटत्रयहिराहत्यावालयावामडंगनम् अथध्या
नम् सिंहूरारुणविग्रहांत्रिनयनांमाणिक्यमौलि

ल· स· प ४

स्फुरत्ताराणनायकशेखरांस्मितमुखीमायीनवक्षोरु
हाम् पाणिभ्याममलिपूर्णरत्नचषकं रक्तोत्पलं विभ्र
तीं सौम्यां रत्नघटस्थरक्तचरणां ध्यायेत्परामंबिकाम्
इति ध्यानं १ मानसैः पंचोपचारैः संपूज्य ॐ श्रीमाते
त्रिललितांबिकाइत्यंतं पठित्वा पुनर्ऋष्यादिन्यासा
दिपूजांतं कृत्वोत्तरफलश्रुतिपाठं कुर्यात् ॐ श्रीमा
ता श्रीमहाराज्ञी श्रीमत्पंचदशाक्षरी चिदग्निकुंड

संभूतादेवकार्यसमुद्यता ५२ उद्यद्भानुसहस्रा
भाचतुर्बाहुसमन्विता रागस्वरूपपाशाढ्यक्रो
धाकारांकुशोज्ज्वला ५३ मनोरूपेक्षुकोदंडापंच
तन्मात्रसायका निजारुणप्रभापूरमज्जद्ब्रह्मां
डमंडला ५४ चंपकाशोकपुन्नागसौगंधिकल
सत्कचा कुरुविंदमणिश्रेणीकनत्कोटीरमंडिता
५५ अष्टमीचंद्रविभ्राजदलिकस्थलशोभिता

ल० मुखचंद्रकलंकाभमृगनाभविशेषिका ५६ वदन
स० स्मरमांगल्यगृहतोरणचिल्लिका वक्त्रलक्ष्मीपरीवा
५ हचलन्मीनाभलोचना ५७ नवचंपकपुष्पाभना
सादंडविराजिता ताराकांतितिरस्कारिनासाभरण
भास्वरा ५८ कदंबमंजरीक्लृप्तकर्णपूरमनोहरा
ताटंकयुगलीभूततपनोडुपमंडला ५९ पद्मरा
गशिलादर्शपरिभाविकपोलभूः नवविद्रुमबिं

बश्रीन्यक्कारिरदनछदा ८० शुद्धविद्यांकुराका
रद्विजपंक्तिद्वयोज्वला कर्पूरवीटिकामोदसमाक
र्षिदिगंतरा ८१ निजसंलापमाधुर्यविनिर्भर्त्सित
कछपी मंदस्मितप्रभापूरमज्जत्कामेशमानसा
८२ अनाकलितसादृश्यचिबुकश्रीविराजिता का
मेशबद्धमांगल्यसूत्रशोभितकंधरा ८३ कनकां
गदकेयूरकमनीयभुजान्विता रत्नग्रैवेयचिंताक

ल. लोलमुक्ताफलान्विता ५४ कामेश्वरप्रेमरत्नमणिप्र
स. तिपणस्तनी नाभ्यालवालरोमालिलताफलकुचद्व
१० यी ५५ लक्ष्यरोमलताधारतासमुन्नेयमध्यमा स्त
नभारदलन्मध्यपट्टबंधवलित्रया ५६ अरुणारुण
कौसुंभवस्त्रभास्वत्कटीतटी रत्नकिंकिणिकारम्यर
शनादामभूषिता ५७ कामेशज्ञातसौभाग्यमार्दवो
रुद्वयान्विता माणिक्यमुकुटाकारजानुद्वयविराजि

ना ८८ इंद्रगोपपरिक्षिप्तस्मरतूणाभजंघिका गू
ढगुल्फा कूर्मपृष्ठजयिष्णुप्रपदान्विता ८९ नख
दीधितिसंछन्ननमज्जनतमोगुणा पदद्वयप्रभा
जालपराकृतसरोरुहा ९० सिंजानमणिमंजीर
मंडितश्रीपदांबुजा मरालीमंदगमना महालाव
ण्यशेवधिः ९१ सर्वारुणानवद्यांगी सर्वाभरणभू
षिता शिवकामेश्वरांकस्था शिवास्वाधीनवल्लभा ९२

ल· सुमेरुमध्यशृङ्गस्था श्रीमन्नगरनायिका चिंतामणि
स· गृहान्तःस्था पंचब्रह्मासनस्थिता ७३ महापद्माटवी
११ संस्था कदम्बवनवासिनी सुधासागरमध्यस्था का
माक्षी कामदायिनी ७४ देवर्षिगणसंघातस्तूय
मानात्मवैभवा भंडासुरवधोद्युक्तशक्तिसेनासमा
वृता ७५ संपत्करीसमारूढसिंधुरव्रजसेविता
अश्वारूढाधिष्ठिताश्वकोटिकोटिभिरावृता ७६

चक्रराजरथारूढसर्वायुधपरिष्कृता मेयचक्रर
थारूढमंत्रिणीपरिसेविता ७७ किरिचक्ररथारू
ढदंडनाथापुरस्कृता ज्वालामालिनिकाक्षिप्तव
ह्निप्राकारमध्यगा ७८ भंडसैन्यवधोद्युक्तशक्ति
विक्रमहर्षिता नित्यापराक्रमाटोपनिरीक्षणस
मुत्सुका ७९ भंडपुत्रवधोद्युक्तबालाविक्रमनंदि
ता मंत्रिण्यंबाविरचितविषंगवधतोषिता ८०

ल॰ विशुक्रप्राणहरणवाराहीवीर्यनंदिता कामेश्वरमु
स॰ खालोककल्पितश्रीगणेश्वरा ८१ महागणेशनि
१२ र्भिन्नविघ्नयंत्रप्रहर्षिता भंडासुरेंद्रनिर्मुक्तशस्त्र
प्रत्यस्त्रवर्षिणी ८२ करांगुलिनखोत्पन्ननारायण
12 दशाकृतिः महापाशुपतास्त्राग्निनिर्दग्धासुरसैनि
का ८३ कामेश्वरास्त्रनिर्दग्धसभंडासुरशून्यका
ब्रह्मोपेंद्रमहेंद्रादिदेवसंस्तुतवैभवा ८४ हरने

त्राग्निसंदग्धकामसंजीवनौषधिः श्रीमद्वाग्भव
कूटैकस्वरूपमुखपंकजा ८५ कंठादिकटिपर्य्य
न्तमध्यकूटस्वरूपिणी शक्तिकूटैकतापन्नकट्य
धोभागधारिणी ८६ मूलमंत्रात्मिकामूलकूटत्र
यकलेवरा कुलामृतैकरसिकाकुलसंकेतपालि
नी ८७ कुलांगनाकुलांतःस्थाकौलिनीकुलयोगि
नी अकुलासमयांतःस्थासमयाचारतत्परा ८८

ल· मूलाधारैकनिलया ब्रह्मग्रंथिविभेदिनी मणिपूरांतरु
स· दिता विष्णुग्रंथिविभेदिनी ८९ आज्ञाचक्रांतरालस्था
१३ रुद्रग्रंथिविभेदिनी सहस्रारांबुजारूढा सुधासारा
भिवर्षिणी ९० तडिल्लतासमरुचिः षट्चक्रोपरिसं
स्थिता महाशक्तिः कुंडलिनी बिसतंतुनिभाकृतिः
९१ भवानी भावनागम्या भवारण्यकुठारिका भद्रप्रि
या भद्रमूर्तिर्भक्तसौभाग्यदायिनी ९२ भक्तिप्रिया

भक्तिगम्याभक्तिवश्याभयापहा शांभवीशारदा
राध्याशर्वाणीशर्मदायिनी ९३ शांकरीश्रीकरी
साध्वीशरच्चंद्रनिभानना शातोदरीशांतिमती
निराधारानिरंजना ९४ निर्लेपानिर्मलानित्यानि
राकारानिराकुला निर्गुणानिष्कलाशांतानिष्का
मानिरुपप्लवा ९५ नित्यमुक्तानिर्विकारानिष्प्र
पंचानिराश्रया नित्यशुद्धानित्यबुद्धानिरवद्यानि

ल॰ रंजना ९६ निष्कारणा निष्कलंका निरुपाधिर्निरीश्वरा
स॰ नीरागा रागमथना निर्मदा मदनाशिनी ९७ निश्चिंता
१४ निरहंकारा निर्मोहा मोहनाशिनी निर्ममा ममताहं
त्री निष्पापा पापनाशिनी ९८ निष्क्रोधा क्रोधशम
नी निर्लोभा लोभनाशिनी निःसंशया संशयघ्नी नि
र्भवा भवनाशिनी ९९ निर्विकल्पा निराबाधा निर्भे
दा भेदनाशिनी निर्नाशा मृत्युमथनी निष्क्रिया नि

त्परिग्रहा १० निस्तुलानीलचिकुरानिरपायानिर
त्यया दुर्लभादुर्गमादुर्गादुःखहन्त्रीसुखप्रदा ११
दुष्टदूरादुराचारशमनीदोषवर्जिता सर्वज्ञासा
द्रकरुणासमानाधिकवर्जिता २ सर्वशक्तिमयी
सर्वमंगलासद्गतिप्रदा सर्वेश्वरीसर्वमयीसर्व
मंत्रस्वरूपिणी ३ सर्वयंत्रात्मिकासर्वतंत्ररूपा
मनोन्मनी माहेश्वरीमहादेवीमहालक्ष्मीमृडप्रि

ल॰ या ४ महारूपामहापूज्यामहापातकनाशिनी
स॰ महामायामहासत्त्वामहाशक्तिर्महारतिः ५ महा
१५ भोगामहैश्वर्यामहावीर्यामहाबला महाबुद्धिर्म
हासिद्धिर्महायोगेश्वरेश्वरी ६ महातंत्रामहामंत्रा
15 महायंत्रामहासना महायागक्रमाराध्यामहाभै
रवपूजिता ७ महेश्वरमहाकल्पमहातांडवसा
क्षिणी महाकामेशमहिषीमहात्रिपुरसुंदरी ८

चतुःषष्ट्युपचाराढ्या चतुःषष्टिकलामयी महाच
तुःषष्टिकोटियोगिनीगणसेविता ९ मनुविद्या
चंद्रविद्या चंद्रमंडलमध्यगा चारुरूपा चारुहासा
चारुचंद्रकलाधरा १० चराचरजगन्नाथा चक्रराज
निकेतना पार्वती पद्मनयना पद्मरागसमप्रभा ११
पंचप्रेतासनासीना पंचब्रह्मस्वरूपिणी चिन्मयी
परमानंदा विज्ञानघनरूपिणी १२ ध्यानध्यातृध्ये

ल॰ यरूपाधर्माधर्मविवर्जिता विश्वरूपाजागरिणीस्वपं
स॰ तीतैजसात्मिका १३ सुप्ताप्राज्ञात्मिकातुर्यासर्वाव
१८ स्थाविवर्जिता सृष्टिकर्त्रीब्रह्मरूपागोप्त्रीगोविंद
16 रूपिणी १४ संहारिणीरुद्ररूपातिरोधानकरीश्व
री सदाशिवानुग्रहदापंचकृत्यपरायणा १५ भानु
मंडलमध्यस्थाभैरवीभगमालिनी पद्मासनाभ
गवतीपद्मनाभसहोदरी १६ उन्मेषनिमिषोत्प

न्नविपन्नभुवनावली सहस्रशीर्षवदना सह
स्राक्षी सहस्रपात् १७ आब्रह्मकीटजननी वर्णा
श्रमविधायिनी निजाज्ञारूपनिगमा पुण्यापुण्य
फलप्रदा १८ श्रुतिसीमन्तसिंदूरीकृतपादाब्जधू
लिका सकलागमसंदोहशुक्तिसंपुटमौक्तिका १९
पुरुषार्थप्रदा पूर्णा भोगिनी भुवनेश्वरी अंबिका
नादिनिधना हरिब्रह्मेन्द्रसेविता २० नारायणी ना

ल· स· १७

17

दरूपानामरूपविवर्जिता ह्रींकारीह्रीमतीहृद्याहे
योपादेयवर्जिता २१ राजराजार्चिताराज्ञीरम्याराजी
वलोचना रंजिनीरमणीरस्यारणत्किंकिणिमेखला
२२ रमाराकेंदुवदनारतिरूपारतिप्रिया रक्षाक
रीराक्षसघ्नीरामारमणलंपटा २३ काम्याकामक
लारूपाकदंबकुसुमप्रिया कल्याणीजगतीकंदा
करुणारससागरा २४ कलावतीकलालापाकां

नाकादंबरीप्रिया वरदावामनयनावारुणीमद
विह्वला २५ विश्वाधिकावेदवेद्याविंध्याचलनि
वासिनी विधात्रीवेदजननीविष्णुमायाविलासि
नी २६ क्षेत्रस्वरूपाक्षेत्रेशीक्षेत्रक्षेत्रज्ञपालिनी
क्षयवृद्धिविनिर्मुक्ताक्षेत्रपालसमर्चिता २७ वि
जयाविमलावंद्यावंदारुजनवत्सला वाग्वादिनी
वामकेशीवह्निमंडलवासिनी २८ भक्तिमत्कल्प

ल· स· १८ 18

ल्लतिकापशुपाशविमोचिनी संहृताशेषपाषंडास
दाचारप्रवर्त्तिका २९ तापत्रयाग्निसंतप्तसमाह्लाद
नचंद्रिका तरुणीतापसाराध्या तनुमध्या तमोपहा
३० चितिस्तत्पदलक्ष्यार्था चिदेकरसरूपिणी स्वा
त्मानंदलवीभूतब्रह्माद्यानंदसंततिः ३१ पराप्रत्य
क्चितीरूपा पश्यंती परदेवता मध्यमा वैखरीरू
पा भक्तमानसहंसिका ३२ कामेश्वरप्राणनाडीकृ

नन्दाकामप्रपूजिता शृंगाररससंपूर्णाजयाजालंध
रस्थिता ३३ ओड्याणपीठनिलयाबिंदुमंडलवासि
नी रहोयागक्रमाराध्यारहस्तर्पणतर्पिता ३४
सद्यःप्रसादिनीविश्वसाक्षिणीसाक्षिवर्जिता षडं
गदेवतायुक्ताषाड्गुण्यपरिपूरिता ३५ नित्यक्लिन्ना
निरुपमानिर्वाणसुखदायिनी नित्याषोडशिका
रूपाश्रीकंठार्द्धशरीरिणी ३६ प्रभावतीप्रभारू

ल· पाप्रसिद्धापरमेश्वरी मूलप्रकृतिरव्यक्ताव्यक्ताव्यक्त
स· स्वरूपिणी ३७ व्यापिनीविविधाकाराविद्याविद्यास्व
१५ रूपिणी महाकामेशनयनकुमुदाह्लादकौमुदी
३८ भक्तहार्दतमोभेदभानुमद्भानुसंततिः शिवदू
तीशिवाराध्याशिवमूर्तिःशिवंकरी ३९ शिवप्रिया
शिवपराशिष्टेष्टाशिष्टपूजिता अप्रमेयास्वप्रका
शामनोवाचामगोचरा ४· चिच्छक्तिश्चेतनारूपा

तत्त्वमय्यै नमः

जडशक्तिर्जडात्मिका गायत्रीव्याहृतिः संध्याद्वि
जवृंदनिषेविता ४१ तत्त्वासनातत्त्वमयीपंचकोशां
तरस्थिता निःसीममहिमानित्ययौवनामदशालि
नी ४२ मदघूर्णितरक्ताक्षीमदपाटलगंडभूः चं
दनद्रवदिग्धांगीचांपेयकुसुमप्रिया ४३ कुशला
कोमलाकाराकुरुकुल्लाकुलेश्वरी कुलकुंडाल
याकौलमार्गतत्परसेविता ४४ कुमारगणनाथां

बाह्यष्टिः पुष्टिर्मतिर्धृतिः शांतिः स्वस्तिमतीकांतिर्नंदि
ल- नीविघ्ननाशिनी ४५ तेजोवतीत्रिनयनालोलाक्षीका
स- मरूपिणी मालिनीहंसिनीमातामलयाचलवासिनी
२- ४६ सुमुखीनलिनीसुभ्रूः शोभनासुरनायिका काल
20 कंठीकांतिमतीक्षोभिणीसूक्ष्मरूपिणी ४७ वज्रेश्व
रीवामदेवीवयोवस्थाविवर्जिता सिद्धेश्वरीसिद्धवि
द्यासिद्धमातायशस्विनी ४८ विशुद्धचक्रनिलयार

क्तवर्णा त्रिलोचना खट्वांगादिप्रहरणा वदनैकस
मन्विता ४९ पायसान्नप्रिया त्वक्स्था पशुलोक
भयंकरी अमृतादिमहाशक्तिसंवृता डाकिनीश्व
री ५० अनाहताब्जनिलया श्यामाभा वदनद्वया
दंष्ट्रोज्ज्वलाक्षमालादिधरा रुधिरसंस्थिता ५१
कालरात्र्यादिशक्त्यौघवृता स्निग्धौदनप्रिया म
हावीरेन्द्रवरदा राकिण्यंबास्वरूपिणी ५२ मणि

ल॰ पूराब्जनिलयावदनत्रयसंयुता वज्रादिकायुधो
स॰ पेताडामर्यादिपरीवृता ५३ रक्तवर्णा मांसनिष्ठा
२१ गुडान्नप्रीतमानसा समस्तभक्तसुखदा लाकिन्यं
बास्वरूपिणी ५४ स्वाधिष्ठानांबुजगता चतुर्वक्त्र
मनोहरा शूलाद्यायुधसंपन्ना पीतवर्णातिगर्वि
ता ५५ मेदोनिष्ठा मधुप्रीता बंधिन्यादिसमन्विता
दध्यन्नासक्तहृदया काकिनीरूपधारिणी ५६ मू

लाधारांबुजारूढा पंचवक्त्रास्थिसंस्थिता अंकुशा
दिप्रहरणा वरदादिनिषेविता ५७ मुद्गौदनासक्त
चित्ता साकिन्यंबास्वरूपिणी आज्ञाचक्राब्जनिल
या शुक्लवर्णा षडानना ५८ मज्जासंस्था हंसव
ती मुख्यशक्तिसमन्विता हरिद्रान्नैकरसिका हा
किनीरूपधारिणी ५९ सहस्रदलपद्मस्था सर्व
वर्णोपशोभिता सर्वायुधधरा शुक्रसंस्थिता स

ल· र्वतोमुखी ९० सर्वौषदिनप्रीतचित्ता याकिनीरूपधारि
स· णी स्वाहास्वधामतिर्मेधाश्रुतिःस्मृतिरनुत्तमा ९१ पु
२२ ण्यकीर्तिःपुण्यलभ्यापुण्यश्रवणकीर्त्तना पुलोमजा
र्चिताबंधमोचिनीबंधुरालका ९२ विमर्शरूपिणी
22 विद्याविद्यदादिजगत्प्रसूः सर्वव्याधिप्रशमनीसर्व
मृत्युनिवारिणी ९३ अग्रगण्याचिंत्यरूपाकलिक
ल्मषनाशिनी कात्यायनीकालहंत्रीकमलाक्षनि

सेविता ८४ तांबूलपूरितमुखीदाडिमीकुसुम
प्रभा मृगाक्षीमोहिनीमुख्यामृडानीमित्ररूपि
णी ८५ नित्यतृप्ताभक्तनिधिर्नियंत्रीनिखिलेश्व
री मैत्र्यादिवासनालभ्यामहाप्रलयसाक्षिणी
८६ पराशक्तिःपरानिष्ठाप्रज्ञानघनरूपिणी मा
ध्वीपानालसामत्तामातृकावर्णरूपिणी ८७ म
हाकैलासनिलयामृणालमृदुदोर्लता महनी

ल. स. २३ यादयामूर्त्तिर्महासाम्राज्यदायिनी ८८ आत्मविद्याम
हाविद्याश्रीविद्याकामसेविता श्रीषोडशाक्षरीविद्या
त्रिकूटाकामकोटिका ८९ कटाक्षकिंकरीभूतकम
लाकोटिसेविता शिरःस्थितार्धचंद्राभाभालस्थेंद्र
धनुष्प्रभा ९० हृदयस्थारविप्रख्यात्रिकोणांतरदी
पिका दाक्षायणीदैत्यहंत्रीदक्षयज्ञविनाशिनी ९१
दरांदोलितदीर्घाक्षीदरहासोज्वलन्मुखी गुरुमू

23

र्त्तिर्गुणनिधिर्गोमातागुहजन्मभूः ७२ देवेशीदं
डनीतिस्थादहराकाशरूपिणी प्रतिपन्मुख्यराका
ऽन्ततिथिमंडलपूजिता ७३ कलात्मिकाकलाना
थाकाव्यालापविनोदिनी सचामररमावाणीस
व्यदक्षिणसेविता ७४ आदिशक्तिरमेयात्मा परमा
पावनाकृतिः अनेककोटिब्रह्मांडजननीदिव्यवि
ग्रहा ७५ क्लींकारीकेवलागुह्याकैवल्यपददायि

ल. नी त्रिपुरात्रिजगद्वंद्यात्रिमूर्त्तिस्त्रिदिवेश्वरी ७६ त्र्य
स. क्षरीदिव्यगंधाढ्यासिंदूरतिलकांचिता उमाशैलें
२४ द्रतनयागौरीगंधर्वसेविता ७७ विश्वगर्भास्वर्ण
24 गर्भावरदावागधीश्वरी ध्यानगम्यापरिछेद्याज्ञा
नदाज्ञानविग्रहा ७८ सर्ववेदांतसंवेद्यासत्यानं
दस्वरूपिणी लोपामुद्रार्चितालीलाक्लृप्तब्रह्मां
डमंडला ७९ अदृश्यादृश्यरहिताविज्ञात्रीवेद्य

वर्जिता योगिनी योगदा योग्या योगानंदा युगंध
रा ६० इच्छाशक्तिज्ञानशक्तिक्रियाशक्तिस्वरूपिणी
सर्वाधारा सुप्रतिष्ठा सदसद्रूपधारिणी ६१ अ
ष्टमूर्तिरजाजैत्री लोकयात्राविधायिनी एकाकि
नी भूमरूपा निर्द्वैता द्वैतवर्जिता ६२ अन्नदा वसु
दा वृद्धा ब्रह्मात्मैक्यस्वरूपिणी बृहती ब्राह्मणी
ब्राह्मी ब्रह्मानंदा बलिप्रिया ६३ भाषारूपा बृह

ल. सेनामाभावाभावविवर्जिता सुखाराध्याशुभकरी शो
स. भना सुलभा गतिः ८४ राजराजेश्वरी राज्यदायिनी रा
२५ जवल्लभा राजत्कृपा राजपीठनिवेशितनिजाश्रिता ८५
राज्यलक्ष्मीःकोशनाथा चतुरंगबलेश्वरी साम्राज्यदा
यिनी सत्यसंधा सागरमेखला ८६ दीक्षिता दैत्यशाम
नी सर्वलोकवशंकरी सर्वार्थदात्री सावित्री सच्चि
दानंदरूपिणी ८७ देशकालापरिछिन्ना सर्वगा

सर्वमोहिनी सरस्वतीशास्त्रमयीगुहांबागुह्यदे
वता ८८ सर्वपापविनिर्मुक्तासदाशिवपतिव्र
ता संप्रदायेश्वरीसाध्वीगुरुमंडलरूपिणी ८९
कुलोत्तीर्णाभगाराध्यामायामधुमतीमही गणां
बागुह्यकाराध्याकोमलांगीगुरुप्रिया ९० स्वतंत्रा
सर्वतंत्रेशीदक्षिणामूर्त्तिरूपिणी सनकादिस
माराध्याशिवज्ञानप्रदायिनी ९१ चित्कलानंदक

ल- लिकाप्रेमरूपाप्रियंकरी नामपारायणप्रीतानंदि
स· विधानटेश्वरी ९२ मिथ्याजगदधिष्ठानामुक्तिदामु
२८ क्तिरूपिणी लास्यप्रियालयकरीलज्जारंभादिवंदि
ता ९३ भवदावसुधावृष्टिःपापारण्यदवानला दो
26 र्भाग्यतूलवातूलाजराध्वांतरविप्रभा ९४ भाग्या
ब्धिचंद्रिकाभक्तचित्तकेकिघनाघना रोगपर्वतदंभो
लिर्मृत्युदारुकुठारिका ९५ महेश्वरीमहाकालीम

ह्राग्राक्षामहाप्राना अपर्णाचंडिकाचंडमुंडासुर
निसूदिनी ९६ क्षराक्षरात्मिकासर्वलोकेशीविश्व
धारिणी त्रिवर्गदात्रीसुभगाऽंबकात्रिगुणात्मि
का ९७ स्वर्गापवर्गदाशुद्धाजपापुष्पनिभाकृतिः
ओजोवतीद्युतिधरायज्ञरूपाप्रियव्रता ९८ दुरा
राध्यादुराधर्षापाटलीकुसुमप्रिया महतीमेरु
निलयामंदारकुसुमप्रिया ९९ वीराराध्याविराडू

ल· पाविरज्ञाविस्रतोमुर्वी प्रत्यस्थपापराकाशाद्राणदा
स· प्राणरूपिणी २० मार्तंडभैरवाराध्यामंत्रिणीन्यस्तरा
२७ ज्यधूः त्रिपुरेशीजयत्सेनानिस्त्रैगुण्यापरापरा १ स
त्यज्ञानानंदरूपासामरस्यपरायणा कपर्दिनीक
लामालाकामधुक्कामरूपिणी २ कलानिधिःकाव्य
कलारसज्ञारसशेवधिः पुष्टापुरातनापूज्यापुष्क
रापुष्करेक्षणा ३ परंज्योतिःपरंधामपरमाणुःपरा

त्वरा पाशहस्ता पाशहंत्री परमंत्रविभेदिनी ४ मू
र्त्तामूर्त्ता नित्यतृप्ता मुनिमानसहंसिका सत्यव्रता
सत्यरूपा सर्वांतर्यामिणी सती ५ ब्रह्माणी ब्रह्मज
ननी बहुरूपा बुधार्चिता प्रसवित्री प्रचंडाज्ञा प्रति
ष्ठा प्रकटाकृतिः ६ प्राणेश्वरी प्राणदात्री पंचाश
त्पीठरूपिणी विशृंखला विविक्तस्था वीरमाता वि
यत्प्रसूः ७ मुकुंदा मुक्तिनिलया मूलविग्रहयारि

णी भावज्ञा भवरोगघ्नी भवचक्रप्रवर्त्तिनी ८ छंदःसा
रा शास्त्रसारा मंत्रसारा तलोदरी उदारकीर्त्तिरुद्दाम
वैभवा वर्णरूपिणी ९ जन्ममृत्युजरातप्तजनविश्रा
न्तिदायिनी सर्वोपनिषदुद्घुष्टा शांत्यतीतकला
त्मिका १० गंभीरा गगनान्तःस्था गर्विता गानलोलुपा
कल्पनारहिता काष्ठाकान्ताकान्तार्धविग्रहा ११ कार्य
कारणनिर्मुक्ता कामकेलितरंगिता कनत्कनकता

टंकालीलाविग्रहधारिणी १२ अज्ञानध्वयविनिर्मुक्ता

मुग्धादिप्रप्रसादिनी अंतर्मुखसमाराध्याबहिर्मुख

सुदुर्लभा १३ त्रयीत्रिवर्गनिलयात्रिस्थात्रिपुरमालि

नी निरामयानिरालंबास्वात्मारामासुधास्त्रुतिः १४

संसारपंकनिर्मग्नसमुद्धरणपंडिता यज्ञप्रियायज्ञ

कर्त्रीयजमानस्वरूपिणी १५ धर्माधाराधनाध्यक्षा

नधान्यविवर्द्धिनी विप्रप्रियाविप्ररूपाविश्वभ्रमण

ल॰ कारिणी १८ विश्वग्रासाविड्माभावैस्नवीविस्नरूपि
स॰ णी श्रयोनिर्योनिनिलयाकूटस्थाकुलरूपिणी १७
२५ वीरगोष्ठीप्रियावीरानैष्कर्म्यानादरूपिणी विज्ञानक
२९ लनाकल्याविदग्धाबैंदवासना १८ तत्वाधिकातत्वम
यीतत्वमर्थस्वरूपिणी सामगानप्रियासौम्यासदाशि
वकुटुंबिनी १९ सव्यापसव्यमार्गस्थासर्वापद्विनिवा
रिणी स्वस्थास्वभावमधुरधीराधीरसमर्चिता २० चै

तन्यार्घ्यसमाराध्याचैतन्यकुसुमप्रिया सदोदिता
सदातुष्टातरुणादित्यपाटला २१ दक्षिणादक्षि
णाराध्यादरस्मेरमुखाम्बुजा कौलिनीकेवलान
र्घ्यकैवल्यपददायिनी २२ स्तोत्रप्रियास्तुतिम
तीश्रुतिसंस्तुतवैभवा मनस्विनीमानवतीमहे
शीमंगलाकृतिः २३ विश्वमाताजगद्धात्रीविशा
लाक्षीविरागिणी प्रगल्भापरमोदारापरमोदा

ल. स. ३.

30

मनोन्मनी २४ व्योमकेशी विमानस्था वज्रिणी वाम
केश्वरी पंचयज्ञप्रिया पंचप्रेतमंचाधिशायिनी २५
पंचमी पंचभूतेशी पंचसंख्योपचारिणी शाश्वती
शाश्वतैश्वर्या शर्मदा शंभुमोहिनी २६ धराधरसुता
धन्या धर्मिणी धर्मवर्द्धिनी लोकातीता गुणातीता
सर्वातीता शमात्मिका २७ बंधूककुसुमप्रख्या बा
लालीलाविनोदिनी सुमंगली सुखकरी सुवेषा

ढ्यासुवासिनी २८ सुवासिन्यर्चनप्रीताशोभनाशु
द्धमानसा बिंदुतर्पणसंतुष्टापूर्वजात्रिपुरांबि
का २९ दशमुद्रासमाराध्यात्रिपुराश्रीःवशंकरी
ज्ञानमुद्राज्ञानगम्याज्ञानज्ञेयस्वरूपिणी ३० यो
निमुद्रात्रिखंडेशीत्रिगुणांबात्रिकोणगा अनघा
द्भुतचारित्रावांछितार्थप्रदायिनी ३१ अभ्यासातिश
यज्ञाताषडध्वातीतरूपिणी अव्याजकरुणामू

ल. निरज्ञानध्वांतदीपिका ३२ आबालगोपविदितासर्वा
स. नुल्लंघ्यशासना श्रीचक्रराजनिलया श्रीमत्त्रिपुर
३८ सुंदरी ३३ श्रीशिवाशिवशक्त्यैक्यरूपिणीललितां
31 बिका ओं इत्येवंनामसाहस्रंकथितंतेघटोद्भव ३४
रहस्यानांरहस्यंचललिताप्रीतिदायकम् अनेन
सदृशंस्तोत्रंनभूतंनभविष्यति ३५ सर्वरोगप्रश
मनंसर्वसंपत्प्रवर्द्धनं सर्वापमृत्युशमनंकाल

स्तुनिवारणम् ३६ सर्वज्वरार्त्तिशमनं दीर्घा
ष्यप्रदायकं पुत्रप्रदमपुत्राणां पुरुषार्थप्रदा
यकम् ३७ इदं दिपो बाह्मी देव्याः स्तोत्रं प्रीतिवि
धायकम् जपेन्नित्यं प्रयत्नेन ललितोपासिन
त्परः ३८ प्रातःस्नात्वा विधानेन संध्याकर्मसमा
प्य च स्वजागृहं ततो गत्वा चक्रराजं समर्चयेत् ३९
विद्यां जपेत्सहस्रं वा त्रिशतं शतमेव वा रहस्य

ल॰ नामसाहस्रमिदं पश्चात्पठेन्नरः ॥४॥ जन्ममध्ये सकृ
स॰ द्वापि य एवं पठेत्सुधीः तस्य पुण्यमहं वक्ष्ये शृणु
३२ त्वं कुंभसंभव ॥५॥ गंगादिसर्वतीर्थेषु यः स्नात्वा यात्को
32 टिजन्मसु कोटिलिंगप्रतिष्ठां च यः कुर्यादविमुक्त
के ॥६॥ कुरुक्षेत्रे च यो दद्यात्कोटिवारं रविग्रहे कोटीः
सुवर्णभाराणां श्रोत्रियेषु द्विजातिषु ॥७॥ यः कोटी
र्हयमेधानामाहरेद्गांगरोधसि आचरेत्कूपकोटी

येनिर्जले महम्भूतले ४४ द्विजेयः प्रतिदिनं
कोटिब्राह्मणभोजनम् श्रद्धयापरयाकुर्यात्सह
स्त्रपरिवत्सरान् ४५ तत्पुण्यकोटिगुणितं लभे
त्पुण्यमनुत्तमम् रहस्यनामसाहस्रेनाम्नोप्येक
स्यकीर्तनात् ४६ रहस्यनामसाहस्रेनामैकम
पियः पठेत् तस्यपापानिनश्यंतिमहान्त्यपिनसं
शयः ४७ नित्यकर्माननुष्ठानान्निषिद्धकरणाद

ल· पि यस्मायं जायते पुंसां तत्सर्वं नश्यति ध्रुवम् ४८
स· बहुनात्र किमुक्तेन शृणु त्वं कलशीसुत अत्रैकना-
३३ म्नो या शक्तिः पातकानां निवर्तने ४९ तन्निवर्त्यमघं
कर्तुं नालं लोकाश्चतुर्दश यस्त्यक्त्वा नामसाहस्रं
पापहानिमभीप्सति ५० स हि शीतनिवृत्यर्थं हि-
मशैलं निषेवते भक्तो यः कीर्तयेन्नित्यमिदं नाम-
सहस्रकम् ५१ तस्मै श्रीललितादेवी प्रीताभीष्टं

प्रयच्छति प्रकीर्त्तयन्निदं स्तोत्रं कण्ठं भक्तो भवि
ष्यति ५२ नित्यं संकीर्त्तनाशक्तः कीर्त्तयेत्पुण्य
वासरे संक्रान्तौ विषुवे चैव स्वजन्मत्रितयेऽयने
५३ नवम्यां वा चतुर्दश्यां सितायां शुक्रवासरे
कीर्त्तयेन्नामसाहस्रं पौर्णमास्यां विशेषतः ५४
पौर्णमास्यां चंद्रबिंबे ध्यात्वा श्रीललिताम्बिकाम्
पंचोपचारैः संपूज्य पठेन्नामसहस्रकम् ५५ स

ल. वैं रोगाः क्षणाद्ध्वपयंति दीर्घायुष्यं च विंदति अयमायु
स. ष्करो नाम मंत्रयोगः कल्पचोदितः ५६ ज्वरार्त्तं शिर
३४ सि स्पृष्ट्वा पठेन्नामसहस्रकम् तत्क्षणात्स्य शाम
याति शिरस्तोदो ज्वरोपि च ५७ सर्वव्याधिनिवृ
त्यर्थं स्पृष्ट्वा भस्म जपेदिदम् तद्भस्मधारणादेव
नश्यंति व्याधयः क्षणात् ५८ जलं संमंत्र्य कुंभ
स्थं नामसाहस्रतो मुने अभिषिंचेद्ग्रहग्रस्तान्ग्र

ज्ञानक्षपितितल्लगात् ७९ सुधासागरमध्यस्थां
ध्यात्वा श्रीललितांबिकाम् यः पठेन्नामसाहस्र
विघ्नं तस्य विनश्यति ८० वंध्यानां पुत्रलाभाय ना
मसाहस्रमंत्रितम् नवनीतं प्रदद्यात्तु पुत्रला
भो भवेद्ध्रुवम् ८१ देव्याः पाशेन संबद्धामाकृष्टा
मंकुशेन च ध्यात्वाभीष्टां स्त्रियं रात्रौ पठेन्नामस
हस्रकम् ८२ आयाति स्वसमीपं सा यद्यप्यंतः

ल० पुरंगता राजाकर्मणाकामस्थेद्राजावसुधादिशुवः
स० ९३ त्रिवारंयःपठेदेतच्छ्रीदेवीध्यानतत्परः सदा
३५ जापारवपेपनत्रंगवामनेगजम् ९४ ब्रह्महत्या
यानिनिकृतंदासर्ववस्त्राणियत्पच नस्मैराज्यंचको
शंचदद्यादेववंशागतः ९५ रहस्यनामसाहस्रं
यःकीर्तयतिनित्यशः तन्मुखालोकमात्रेणमु
ह्येल्लोकत्रयंमुने ९६ यस्त्विदंनामसाहस्रंसक

35

त्पठतिभक्तिमान् तस्ययेशत्रवस्तेषांनिहन्ता
शारमेश्वरः ८७ योवाभिचारंकुरुतेनामसाह
स्रपाठके निवर्त्यतत्क्रियांहन्यात्तंवैप्रत्यंगिरा
स्वयम् ८८ येक्रूरदृष्ट्यावीक्ष्यन्तेनामसाहस्रपा
ठकम् तानंधान्कुरुतेक्षिप्रंस्वयंमार्त्तंडभैरवः
८९ धनंयोहरतेचौरैर्नामसाहस्रजापिनः यत्र
कुत्रस्थितंवापिक्षेत्रपालोनिहन्तितम् ९० दिव्या

ल॰ स्तुक्रतेवादंयोविद्वान्नामजापिनः तस्यवाक्स्तंभ
स॰ नंसयःकरोतिनकुलेश्वरी ७१ योराजाकुरुतेवैरं
३८ नामसाहस्रजापिनः चतुरंगबलंतस्यदंडिनीसं
हरेत्स्वयम् ७२ यःपठेन्नामसाहस्रंषण्मासंभक्ति
संयुतः लक्ष्मीस्त्वाचल्यरहितासदातिष्ठतितद्गृहे
७३ मासमेकंप्रतिदिनंत्रिवारंयःपठेन्नरः भारती
तस्यजिह्वाग्ररंगेनृत्यतिनित्यशः ७४ यस्त्वेकवारं

36

पठनेपद्ममेकमतंद्रितः मुच्यंतिकामवशागा
स्तगात्सत्सस्यवीक्षणात् ७५ यःपठेन्नामसाह
स्रंजन्ममध्येसकृन्नरः नद्दृष्टिगोचराःसर्वेमुच्यं
तेसर्वकिल्बिषैः ७८ योवेजिनामसाहस्रंतस्मै
देयंद्विजन्मने अन्नंवस्त्रंधनंधान्यंनान्येभ्यस्तुक
दाचन ७७ श्रीमंत्रराजंयोवेत्तिश्रीचक्रंयःसमर्च
ति यःकीर्तयतिनामानितंसत्पात्रंविदुर्बुधाः ७८

ल· स· ३७

तस्मै देयं प्रयत्नेन श्रीदेवीप्रीतिमिच्छता न कीर्त
यति नामानि मंत्रराजं न वेत्ति यः ७९ पशुतुल्यः
स विज्ञेयस्तस्मै देयं निरर्थकम् परीक्ष्य विद्याविदु
षस्तेभ्यो दद्याद्विचक्षणः ८० श्रीमंत्रराजसदृशो
यथा मंत्रो न विद्यते देवता ललितातुल्या यथा ना
स्ति च देवता ८१ रहस्यनामसाहस्रतुल्या नास्ति
तथा स्तुतिः लिखित्वा पुस्तके यस्तु नामसाहस्रमु

37

नमम् ८२ समर्चयेत्सदा भक्त्या तस्य तुष्यति सुंदरी
बहूनात्र किमुक्तेन श्रृणु त्वं कुंभसंभव ८३ नानेन
सदृशं स्तोत्रं सर्वतंत्रेषु विद्यते तस्मादुपासको नि
त्यं कीर्तयेदिदमादरात् ८४ एभिर्नामसहस्रैस्तु
श्रीचक्रं योर्चयेत्सकृत् पद्मैर्वा तुलसीपुष्पैरु
ल्हारैर्वा कदंबकैः ८५ चंपकैर्जातिकुसुमैर्मल्लि
काकरवीरकैः उत्पलैर्बिल्वपत्रैर्वा कुंदकेसरपा

ल. स. ३८ 38

दलैः ८६ अन्यैः सुगन्धिकुसुमैः केतकीमाधवीमुखैः तस्य पुण्यफलं वक्तुं न शक्नोति महेश्वरः ८७ सावेत्ति ललितादेवी स्वचक्रार्चनजं फलम् अन्ये कथं विजानीयुर्ब्रह्माद्याः स्वल्पमेधसः ८८ प्रतिमासं पौर्णमास्यामेभिर्नाम सहस्रकैः रात्रौ यश्चक्रराजस्थामर्चयेत्परदेवताम् ८९ स एव ललितारूपस्तद्रूपा ललिता स्वयम् न तयोर्विद्यते भेदो भेदकृत्पाप

कृञ्जवेत् ९० महानवम्यां यो भक्तः श्रीदेवीं चक्रम
ध्यगाम् अर्चयेन्नामसाहस्रैस्तस्य मुक्तिः करे स्थि
ता ९१ यस्तु नामसहस्रेण शुक्रवारे समर्चयेत्
चक्रराजे महादेवीं तस्य पुण्यफलं शृणु ९२ स
र्वान्कामानवाप्येह सर्वसौभाग्यसंयुतः पुत्रपौ
त्रादिसंयुक्तो भुक्त्वा भोगान्यथेप्सितान् ९३ अन्ते
श्रीललितादेव्याः सायुज्यमतिदुर्लभम् प्रार्थनी

यं शिवाद्यैस्तु प्राप्नोत्येव न संशयः ९४ यः सहस्रं ब्रा
ह्मणानामेभिर्नामसहस्रकैः समर्च्य भोजयेद्भक्त्या
पायसापूपषड्रसैः ९५ तस्मै प्रीणाति ललिता स्व
साम्राज्यं प्रयच्छति न तस्य दुर्लभं वस्तु त्रिषु लोके
षु विद्यते ९६ निष्कामः कीर्तयेद्यस्तु नामसाहस्रमु
त्तमम् ब्रह्मज्ञानमवाप्नोति येन मुच्येत बंधनात्
९७ धनार्थी धनमाप्नोति यशोर्थी चाप्नुयाद्यशः

विद्यार्थीचाप्नुयाद्विद्यांनामसाहस्रकीर्तनात् ९६
नानेनसदृशंस्तोत्रंभोगमोक्षप्रदंमुने कीर्तनीय
मिदंतस्माद्भोगमोक्षार्थिभिर्नरैः ९७ चतुराश्रम
निष्ठैश्चकीर्तनीयमिदंसदा स्वधर्मसमनुष्ठान
वैकल्यपरिपूर्तये ९८ कलौपापैकबहुलेधर्मा
नुष्ठानवर्जिते नामानुकीर्तनंमुक्त्वात्राणंनान्य
त्परायणम् १ लौकिकाद्वचनान्मुख्यंविष्णुनामा

ल· तुकीर्तनम् विष्णुनामसहस्राच्च शिवनामैकमुत्तम
स· म् २ शिवनामसहस्राच्च देव्यानामैकमुत्तमम् देवी
४· नामसहस्राणि कोटिशः सन्ति कुंभज ३ तेषु मुख्यं
दशविधं नामसाहस्रमुच्यते रहस्यनामसाहस्रमि
दं शास्तं दशास्वपि ४ तस्मात्संकीर्तयेन्नित्यं कलि
दोषनिवृत्तये मुख्यं श्रीमातृनामेति न जानंति वि
मोहिताः ५ विष्णुनामपराः केचिच्छिवनामपराः

परे नकश्चिदपिलोकेषुललितानामतत्परः ६
येनान्यदेवतानामकीर्त्तितंजन्मकोटिषु तस्यैव
भवतिश्रद्धाश्रीदेवीनामकीर्त्तने ७ चरमेजन्म
नियथाश्रीविद्योपासकोभवेत् नामसाहस्रपा
ठश्चतथाचरमजन्मनि ८ यथैवविरलालोकेश्री
विद्याचारवेदिनः तथैवविरलागुह्यनामसाहस्र
पाठकाः ९ मंत्रराजजपश्चैवचक्रराजार्चनंतथा

ल· रहस्यनामपाठस्य नाल्पस्य तपसः फलम् १० अपठ
स· न्नामसाहस्रं प्रीणये यो महेश्वरीम् स चक्षुषा विना
४२ रूपं पश्यन्निव विमूढधीः ११ रहस्यनामसाहस्रमु
त्क्वा यः सिद्धिकामुकः स भोजनं विना नूनं क्षुन्निवृत्ति
मभीप्सति १२ यो भक्तो ललितादेव्याः स नित्यं कीर्त्त
येदिदम् नान्यथा प्रीयते देवी कल्पकोटिशतैरपि १३
तस्माद्रहस्यनामानि श्रीमातुः प्रयतः पठेत् इति ते

कथितंस्तोत्रंरहस्यंकुंभसंभव १४ नाविद्यावेदिने
ब्रूयान्नाभक्तायकदाचन यथैवगोप्याश्रीविद्यातथा
गोप्यमिदंमुने १५ पशुतुल्येषुनब्रूयाज्जनेषुस्तोत्र
मुत्तमम् योददातिविमूढात्माश्रीविद्यारहिताय
तु १६ तस्मैकुप्यंतियोगिन्यःसोनर्थःसुमहान्स्मृतः
रहस्यनामसाहस्रंतस्मात्संगोपयेदिदम् १७ स्व
तंत्रेणमयानोक्तंनवापिकलशीसुत ललिताप्रे

ल० स० ५२

ण्ादेवमयोक्तंस्तोत्रमुत्तमम् १८ कीर्तनीयमिदंभक्त्या
कुंभयोनेनिरंतरम् तेनतुष्टामहादेवीतवाभीष्ट
प्रदास्यति १९ इत्युक्त्वाश्रीहयग्रीवोध्यात्वाश्रीललि
तांविकाम् आनंदमग्नहृदयःसद्यःपुलकितोभव
त् ३२० इतिश्रीब्रह्मांडपुराणेललितोपाख्यानेस्तो
त्रखंडेललितासहस्रनामस्तोत्रंसंपूर्णम् सं० १९५८